# संस्कृतम्

बहवो जना भारतं गच्छन्ति/ तेषु केचित् संस्कृतं पठितुम् इच्छन्ति/ अतो भारतं गच्छन्ति/ भारते केचिद् वेदा ब्राह्मणान्य् आरण्यकानीत्यादि प्राचीनं वाङ्मयं पठन्ति/ केचित् पुराणानि स्तोत्राणि सूत्राणीत्यादिर्मध्यकालीनं वाङ्मयं पठन्ति/ केचिच्चवृत्तपत्राणि निबन्धाः प्रबन्धा इत्याद्य् आधुनिकं वाङ्मयं पठन्ति/ संस्कृते काव्यमस्ति/ शास्त्रमप्यस्ति/ अतः केचन जनाः काव्यानां रसंपिबन्ति केचनच शास्त्रेषु श्राम्यन्ति/ काव्ये गद्यं पद्यं महाकाव्यानि नाटकानि स्तोत्राणि श्लोका इत्यादि सर्वं भावप्रधानं वाङ्मयं भवति/ शास्त्रे वैद्यकं गणितं दर्शनानीत्यादि सर्वं विचारप्रधानं वाङ्मयं भवति/ पण्डिताः वदन्ति वयं संस्कृतवाङ्मये मानवस्य प्रायः सर्वान् भावान् विचाराश्च पश्यामः/ तत् खलु सहस्रदलं कमलमिव विविधं समुद्र इव गम्भीरमाकाश इव विशालमिति/ भारतीयानां जीवने सर्वत्र संस्कृतं पश्यामः/ संस्कृतशब्दाः संस्कृतविचाराश्च सर्वं भारतीयं वाङ्मयं भूषयन्ति/ भारतीयाः संस्कृतेन देवान्पूजयन्ति/ के चन भारतीयाश्चिन्तयन्ति देवाः संस्कृतं वदन्ति संस्कृतमन्त्राणां संस्कृतस्तोत्राणांश्च पठनं पापं क्षालयति पुण्यंश्च पोषयति/

एवं संस्कृतं जनेभ्य आनन्दं यच्छति जनान्सन्मार्गं नयति जनानांश्च चित्तं हरते/ अतो वयंसंस्कृतंपठामः/